"सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ! ३६ । अभ्यासाद्रमते यत्र दुःखान्तञ्च नियच्छति । यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ३७ । विषयेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमम् । परिणामे विषमिव तत्सुखं राजसं स्मृतम् ३८ । यदग्रे चानुबन्धे च सुखं मोहनमात्मनः । निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ३९ । न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः । सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैः ४०" गीतोक्तेः । "सुखस्य त्रैविध्यं प्रतिजानीते सुखन्त्विति । स्पष्टोऽर्थः ३६ । तत्र सात्त्विकं सुखमाह अभ्यासादिति सार्द्धेन । यत्र यस्मिन् सुखे अभ्यासाद्रमते न तु विषयसुखइव सहसा रतिं प्राप्नोति यस्मिन् रममाणश्च दुःखस्यान्तमवसानं नितरां यच्छति प्राप्नोति । कीदृशं, यत्तत् किमपि अग्रे प्रथमं विषमिव मनःसंयमाधीनत्वाद्दुःखावहमिव भवति परिणामे त्वमृतसदृशं आत्मविषया बुद्धिरात्मबुद्धिस्तस्याः प्रसादो रजस्तमोमयत्यागेन स्वच्छतयावस्थानं ततोजातं यत् सुखं तत्सात्त्विकं प्रोक्तं योगिभिः ३७ । राजसं सुखमाह विषयेति । विषयाणामिन्द्रियाणाञ्च संयोगात् यत्तत् प्रसिद्धं स्त्रीसंसर्गादिसुखं अमृतमुपमा यस्य तादृशं भवति । अग्रे प्रथमं परिणामे च विषतुल्यं इहामुत्र च दुःखहेतुत्वात् तत् सुखं राजसं स्मृतम् ३८ । तामसं सुखमाह यदिति । अग्रे च प्रथमक्षणे अनुबन्धे च पश्चादपि यत्सुखमात्मनो मोहकरम् । तदेवाह निद्रा च आलस्यञ्च प्रमादश्च कर्त्तव्यावधानराहित्येन मनोग्राह्यमेतेभ्य उत्तिष्ठति यत्सुखं तत्तामसमुदाहृतम् ३९ । अनुक्तमपि संगृह्णन् प्रकरणार्थमुपसंहरति न तदिति त्रिभिः । एभिः प्रकृतिसंभवैः सत्त्वादिभिर्गुणैर्मुक्तं हीनं सत्त्वं प्राणिजातम् अन्यद्वा यत् स्यात्तत् पृथिव्यां मनुष्यादिषु दिवि देवेषु च क्वापि नास्तीत्यर्थः" श्रीधरः ।

वैषयिके सुखदुःखे च इष्टानिष्टविषयेन्द्रियसन्निकर्षजज्ञानात् जायमाने अनुभूयेते क्षणिके च "मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ! इति गीतोक्तेः । वैषयिकसुखस्य च क्षणिकत्वात् परिणामादिदुःखरूपत्वाच्च विवेकिभिः त्याज्यत्वमेव 'त्याज्यं सुखं विषयसङ्गमजन्म पुंसाम्" इत्युक्तेः प्रागुक्तपातञ्जलसूत्राच्च विषयेन्द्रियसंयोगाज्जातन्तु सुखं राजसं प्रागुक्तगीतावाक्यात् । तत्र विषयाश्च शब्दस्पर्शरूपरसगन्धाः यथायथं तद्वन्तश्च तत्र शब्दविशेषरूपगीतादिषु श्रवणेन्द्रियसंबद्धेषु यत् सुखं तत् वैषयिकमेव किन्तु आत्मोपासनाङ्गत्वेन गीतादिकमपि चित्तैकाग्र्यतासम्पादनद्वारा मोक्षसाधनं भवति तदुक्तं या० स्मृतौ मिताक्षरायाञ्च ।

"यस्य पुनश्चित्तवृत्तिर्निराकारालम्बनतया समाधौ नाभिरमते तेन शब्दब्रह्मोपासनं कार्य्यमित्याह । 'यथाविधानेन पठन् सामगानमविच्युतम् । सावधानस्तदभ्यासात्परं ब्रह्माधिगच्छति" या० "स्वाध्यायावगतमार्गानतिक्रमेण सामगानं साम्नोगानात्मकत्वेऽपि गानमिति विशेषणम् अगीतमन्त्रव्युदासार्थम् । अविच्युतमस्खलितम् । सावधानः सामध्वन्यनुस्यूतात्मैकाग्र्यचित्तवृत्तिः पठन् तदभ्यासवशात्तत्र निष्णातः शब्दाकारब्रह्मण उपासने परब्रह्माधिगच्छति । तदुक्तम् । "शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छतीति" । यस्य पुनर्वैदिक्याङ्गीतौ चित्तं नाभिरमते तेन लौकिकगीतानुस्यूतात्मोपासनङ्कार्यमित्याह । 'अपरान्तकमुल्लोप्यं मद्रकम्प्रकरीन्तथा । औवेणकं सरोविन्दुमुत्तरङ्गीतकानि च । ऋग्गाथापाणिकादक्षविहिता ब्रह्मगीतिका । गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम्" या० । अपरान्तकोल्लोप्यमद्रकप्रकर्य्यौवेणकसरोविन्दुसहितञ्चोत्तरमित्येतानि प्रकरणाख्यानि सप्त गीतकानि । चशब्दादासारितवर्द्धमानकादिमहागीतकानि गृह्यन्ते । गाथाद्याश्चतस्रोगीतिका गृह्यन्ते । ऋग्गाथाद्याश्चतस्रोगीतिकाइत्येतदपरान्तकादिगीतजातमध्यारोपितात्मभावम्मोक्षसाधनत्वान्मोक्षसंज्ञितं मन्तव्यम् तदभ्यासस्यैकाग्र्यतापादनद्वारेणात्मैकतापत्तिकारणत्वात् । किञ्च । 'वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः । तालज्ञश्चाप्रयासेन मोक्षमार्गं नियच्छति" या० । भरतमुनिप्रतिपादितवीणावादनतत्त्ववेदी श्रूयत इति श्रुतिर्द्वाविंशतिविधा सप्तस्वरेषु । तथा हि षड्जमध्यमपञ्चमाः प्रत्येकं चतुःश्रुतय ऋषभधैवतौ प्रत्येकन्त्रिश्रुतौ । गान्धारनिषादौ प्रत्येकं द्विश्रुतौ इति । जातयस्तु षड्जादयः सप्त शुद्धाः सङ्करजातयस्त्वेकादशेत्येवमष्टादशविधास्तासु विशारदः प्रवीणः तालइति गीतप्रमाणङ्कथ्यते तत्स्वरूपज्ञश्च तदनुविद्धब्रह्मोपासनतया तालादिभङ्गभयाच्चित्तवृत्तेरात्मैकाग्र्यतायाः सुकरत्वादल्पायासेनैव मुक्तिपथन्नियच्छति प्राप्नोति । चित्तविक्षेपाद्यन्तरायोपेतस्य गीतज्ञस्य फलान्तरमाह । "गीतज्ञोयदि योगेन नाप्नोति परमम्पदम् ।